## विदाङ्कुर्वन्त्वित्यन्यतरस्याम् । (४१/२४६५)

विदाङ्कुर्वन्तु इत्येतदन्यतरस्यां निपात्यते । किं पुनरिह निपात्यते ? विदेर्लोटि आम् प्रत्ययः, गुणाभावः, लोटो लुक्, कृञश्च लोट्परस्यानुप्रयोगः । अत्रभवन्तो विदाङ्कुर्वन्तु, [1]विदन्तु । इतिकरणः प्रदर्शनार्थः, न केवलं [2]प्रथमपुरुषबहुवचनं, किं तर्हि सर्वाण्येव लोड्वचनान्यनुप्रयुज्यन्ते, विदाङ्करोतु, विदाङ्कुरुतात्, विदाङ्कुरुताम्, विदाङ्कुरु, विदाङ्कुरुतम्[3] इत्यादि ॥

## अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद् विदामक्रन्निति च्छन्दसि । (४२/३४०३)

अभ्युत्सादयाम् इत्येवमादयः छन्दसि विषयेऽन्यतरस्यां निपात्यन्ते । सदिजनिरमीणां ण्यन्तानां लुङि आम् प्रत्ययो निपात्यते । चिनोतेरपि [4]तत्रैवाम्प्रत्ययो द्विर्वचनं कुत्वं च । अकर् इति चतुर्भिरपि प्रत्येकमनुप्रयोगः सम्बध्यते । पावयांक्रियात् इति पवतेः पुनातेर्वा ण्यन्तस्य लिङि आम् निपात्यते, गुणाभावश्च, अक्रन् इति चास्यानुप्रयोगः । विदामक्रन् इति विदेर्लुङि आम् निपात्यते, गुणाभावश्च, अक्रन् इति चास्यानुप्रयोगः । 'अभ्युत्सादयामकः' (मै. १.६.५) । अभ्युदसीषदत् इति भाषायाम् । 'प्रजनयामकः' (मै. १. ६. १०) । प्राजीजनत् इति भाषायाम् । चिकयामकः । अचैषीत् इति भाषायाम् । 'रमयामकः' (काठकसं. ७. ७) । अरीरमत् इति भाषायाम् । 'पावयाङ्क्रियात्' (मै. २. १. ३) । पाव्यात् इति भाषायाम् । 'विदामक्रन्' (मै. १. ४. ७, तै. ब्रा. १. ३. १०. ३) । अवेदिषुः इति भाषायाम्[5] ॥

## च्लि लुङि । (४३/२२२१)

धातोः च्लिः प्रत्ययो भवति लुङि परतः । इकार उच्चारणार्थः, चकारः स्वरार्थः (६. १. १६३/३७१०) । अस्य सिजादीनादेशान् वक्ष्यति । तत्रैवोदाहरिष्यामः ॥

## च्लेः सिच् । (४४/२२२२)

च्लेः सिजादेशो भवति । इकार उच्चारणार्थः, चकारः स्वरार्थः । अकार्षीत् । अहार्षीत् । आगमानुदात्तत्वं हि प्रत्ययस्वरमिव चित्स्वरमपि बाधेत इति स्थानिन्यादेशे च द्विश्चकारोऽनुबध्यते ।

[२०७] स्पृशमृशकृषतृपदृपां सिज्वा वक्तव्यः ।

अस्प्राक्षीत्, अस्पार्क्षीत्, अस्पृक्षत् (३.१.४५/२३३६) । अम्राक्षीत्, अमार्क्षीत्, अमृक्षत् । अकार्षीत्, अक्राक्षीत्, अकृक्षत् । अत्राप्सीत्, आताप्सीत्, अतृपत् (३.१.५५/२३४३) । अद्राप्सीत्, अदार्प्सीत्, अदृपत् ॥

---

1. अत्रभवन्तः इत्यधिकम् अ. 2. प्रथमपुरुषस्य ग. 3. विदांकुर्वन्तु विदांकुरुत विदांकरवाणि विदांकरवाव विदांकरवाम इत्यधिकम् । इत्यादि नास्ति अ. क. ड. ह. 4. अत्रैव ड. 5. इतिकरणः प्रयोगप्रदर्शनार्थः इत्यधिकम् न्या.